❀ हरि आरती ❀

ॐ जय जगदीश हरे, स्वामी जै जगदीश हरे। भक्त जनन के संकट क्षण में दूर करें ॥ ॐ जय० ॥
जो ध्यावे फल पावे दुख विनशे मन का। सुख संपति घर आवे कष्ट मिटे तन का ॥ ॐ जय० ॥
मात पिता तुम मेरे शरण गहूँ किसकी। तुम विन और न दूजा आस करूँ किसकी ॥ ॐ जय० ॥
तुम हो पूरण परमात्मा तुम अन्तर यामी। पारब्रह्म परमेश्वर तुम सबके स्वामी ॥ ॐ जय० ॥
तुम करुणा के सागर तुम पालन कर्ता। मैं मूरख खल कामी कृपा करो भर्ता ॥ ॐ जय० ॥
तुम हो एक अगोचर सबके प्राण पती। किस विधि मिलूँ दयामय तुमको मैं कुमती ॥ ॐ जय० ॥
दीन बन्धु दुख हर्ता तुम ठाकुर मेरे। अपने हाथ उठाओ द्वार पड़ा तेरे ॥ ॐ जय० ॥
विषय विकार मिटाओ पाप हरो देवा। श्रद्धा भक्ति बढ़ाओ सन्तन की सेवा ॥ ॐ जय० ॥

——:०:——

❀ आरती श्री सत्यनारायणजी की ❀

ॐ जय लक्ष्मी रमणा, ॐ जय लक्ष्मी रमणा । सत्य नारायण स्वामी जन पातक हरणा ।। टेक ।।
रत्न जटित सिंहासन अद्भुत छवि राजे । नारद करत निरंजन घंटा ध्वनि बाजे ।।ॐ जय० १।।
प्रकट भये कलि कारण द्विज को हर्ष दियो । बूढ़ा ब्रह्मण बनकर कंचन महल कियो ।।ॐ जय० २।।
दुर्बल भील कराल जिन पर कृपा करी । चन्द चूर्ण एक राजा जिसकी बिपत हरी ।।ॐ जय० ३।।
वैश्य मनोरथ पायो श्रद्धा तज दीनी । सो फल भोग्यो प्रभुजी फिर स्तुति कीनी ।।ॐ जय० ४।।
भाव भक्ति के कारण क्षण क्षण रूप धरो । श्रद्धा धारण कीनीं तिन को काज सरो ।।ॐ जय० ५।।
ग्वाल बाल संग राजा बन में भक्ति करी । मन वांछित फल दीना दीन दयाल हरी ।।ॐ जय० ६।।
चढ़त प्रसाद सवाया कजली फल मेवा । धूप दीप तुलसी से राजी सत्य देवा ।।ॐ जय० ७।।
श्री सत्यनारायणजी की जो आरती गावे । भनतदास सुख संपति मन वांछित फल पावे ।।ॐ जय० ८।।

——:०:——

हमारे अमूल्य प्रकाशन

हरि तालिका व्रत संबंधी ३)
हनुमन्त बावनी स्तोत्र) ६० पैसे
शिव पुराण भाषा सचित्र
सजिल्द ६०)
सुखसागर मध्यम सचित्र
सजिल्द छप रही है।
रामायण सटीक भारद्वाज
सचित्र सजिल्द छप रही है।
विश्राम सागर सटीक
सचित्र सजिल्द १०८)
योगवाशिष्ठ संपूर्ण दो
जिल्दों में २५०)
भक्तमाल सटीक बड़ा
सजिल्द छप रही है।

स्त्री सुबोधिनी सजिल्द ५४)
भक्ति सागर चरणदास
कृत सजिल्द ६०)
गरुड़ पुराण सटीक छप रही है।
महाभारत भाषा सचित्र
सजिल्द ६६)
भगवद्गीता भाषा
सजिल्द १२)
दुर्गा भाषा टीका सजिल्द छप रही है।
अष्टावक्र गीता सटीक २४)
चित्रकूट माहात्म्य ३) ६० पैसे
शतपंच चौपाई २)
विवाह पद्धति खुला पत्रा
भाषा टीका ६)

अनुराग सागर छप रही है।
नवीन संग्रह ६)
सुन्दर विलास ७) ५० पैसे
भैषज्य रत्नावली सटीक
सजिल्द वैद्यक छप रही है।
शार्ङ्गधर सटीक छप रही है।
अमृतसागर सजिल्द ६०)
माधव निदान वैद्यक ३६)
हंसराज निदान ,, ६)
नीम और उसके सौ
उपयोग २) ५० पैसे
नींबू और उसके सौ
उपयोग २) ५० पैसे

डाक्टर तुलसी २) ५० पैसे
डाक्टर शहद ३)
इलाजुल्गुर्बा नागरी २१)
वृहत् पाकावली ३)
कर्म विपाक संहिता
ज्योतिष २०)
मुहूर्त चिन्तामणि
ज्योतिष २४)
लग्न चन्द्रिका ज्योतिष १८)
प्रश्न प्रकाश ,, ३)
फल प्रकाश ,, २) ५० पैसे
आल्ह खण्ड सजिल्द ५१)

मैनेजर—तेजकुमार बुकडिपो (प्रा०) लिमिटेड,
पोस्ट बाक्स ८५, त्रिलोकनाथ रोड, लखनऊ.

॥ अथापात्रिकपार्वणश्राद्धप्रयोगः ॥

मुद्रक और प्रकाशक–

खेमराज श्रीकृष्णदास,

मालिक–"श्रीवेङ्कटेश्वर" स्टीम्–प्रेस, बम्बई.

पुनर्मुद्रणादि सर्वाधिकार "श्रीवेङ्कटेश्वर" यन्त्रालयाध्यक्षाधीन है।

श्रीगणेशायनमः ॥ अथापात्रिकपार्वणश्राद्धप्रयोगः ॥ अपराह्णे स्नातः शुक्ल द्विवासाः शुचिराचम्य वस्त्रादिनावेष्टितं श्राद्धदेशमागच्छेत् ॥ ततः प्राङ्मुखउप विश्य सिद्धान्नसंभवे सिद्धमितिपाचिकां पृच्छा ॐ अपवित्र इत्यादिपठित्वा ॐ पुण्ड रीकाक्षः पुनात्विति कुशत्रयानीतजलैः श्राद्धवस्तूनिसिंचेत् रक्षार्थंदीपं निधाय गौरसर्षपैरवकीर्य्य । ॐ नमोनमस्तेगोविन्दपुराणपुरुषोत्तम । इदं श्राद्धंहृषीकेश रक्षत्वं सर्वतोदिशः । प्राच्यै नमः अवाच्यैनमः प्रतीच्यैनमः उदीच्यैनमः यवपुष्पैः भूम्यैनमः इतिभूमिं त्रिः संपूज्य पादयोरधः कुशत्रयंदत्त्वा ततः कुशत्रयतिल जलैः संकल्पंकुर्य्यात् ॐ अद्यामुकमासीयामुकपक्षीयामुकतिथौअमुकगोत्राणां पितृपितामहप्रपितामहानां अमुकामुकशर्मणां अमुकगोत्राणां मातामहप्रमातामह

वृद्धप्रमातामहानाममुकामुकशर्मणामपात्रिकपार्वणश्राद्धमहं करिष्ये ततो गायत्रीं त्रिर्जपित्वा ॐ देवताभ्यइत्यादित्रिर्जपेत् ततउत्तराभिमुखो दक्षिणोत्तरक्रमादासादितकुशत्रयात्मकासनद्वयं प्रथमं दक्षिणमासनंसयवमुत्सृजेत् ॐ अद्यामुकगोत्राणां पितृपितामहप्रपितामहानाममुकामुकशर्मणांपार्वणश्राद्धसंबंधिनोविश्वेदेवाइदमासनंवोनमः इति कुशत्रययवजलैरुत्सृजेत् एवम् ॐ अद्यामुकगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां पार्वणश्राद्धसंबंधिनो विश्वेदेवा इदमासनंवोनमइत्यपरमुत्सृजेत् ततोऽपसव्यं कृत्वा पातितवामजानुर्दक्षिणाऽभिमुखो द्विगुणमुग्नकुशत्रयतिलजलान्यादाय पूर्वपश्चिमासादितमोटकरूपाणि षडासनानि तिलजलप्रोक्षितानि प्रत्येकपित्रादिभ्यः पश्चिमत आरभ्य उत्सृजेत्

तत्र क्रमः ॐ अद्यामुकगोत्रस्यपितुरमुकशर्मणः पार्वणश्राद्धे इदमासनंतेस्व
धा एवं पितामहप्रपितामहयोः ॐ अद्यामुकगोत्रस्य मातामहस्यामुकशर्मणः
पार्वणश्राद्धे इदमासनं ते स्वधा एवमेव प्रमातामहवृद्धप्रमातामहयोर्दद्यात् । ततः
सव्यं कृत्वा ॐ विश्वान्देवानहमावाहयिष्ये इत्युक्त्वा ॐ विश्वेदेवासऽआगत
शृणुयामऽइमर्ठ्ंहवम् एदं बर्हिर्निषीदतेत्यादिना देवानावाह्य ॐ यवोसियवया
स्मद्वेषोयवयारातीरितियवान्विकीर्य्य ॐ विश्वेदेवाः शृणुतेत्यादिजपेत् ॐ आग
च्छंतुमहाभागाविश्वेदेवा महाबलाः । येयत्रयोजिताः श्राद्धे सावधानाभवंतुते इति
श्लोकं च पठेत् ततोऽपसव्यंकृत्वादक्षिणाभिमुखः ॐपितृनहमावाहयिष्ये इत्युक्त्वा
ॐ उशन्तस्त्वानिधीमह्युशन्तः समिधीमहि उशन्नुशतऽ आवहपितॄन्हविषे

ऽअत्तवे इत्यादिनापितॄनावाह्य ॐ अपहताऽअसुरारक्षांसि वेदिषदः इत्यादिना पात्रेषु तिलान् विकीर्य्य ॐ आयंतुनः पितरः सोम्यासोग्निष्ष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञेस्वधयामदंतोधिब्रुवन्तु तेवन्त्वस्मानित्यादि पठेत ततः सव्यं कृत्वा देवार्घपात्रद्वये पवित्रेधृत्वा अपसव्येनपित्राद्यर्घपात्रेषुप्रत्येकंपवित्रं धृत्वा सव्येनदेवार्घपात्रद्वये ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये शंय्योरभिस्रवन्तुनः इत्यादिना जलंप्रक्षिप्य अपसव्येनपित्राद्यर्घपात्रषट्केऽनेनैवमंत्रेणजलं पितृतीर्थेननिक्षिपेत् ततः सव्यंकृत्वा ॐ यवोसियवयास्मद्वेषो यवयारातीरिति देवार्घपात्रद्वये प्रत्येकंयवान्प्रक्षिप्य अपसव्येन पित्राद्यर्घपात्रेषु प्रत्येकम् ॐ तिलोसिसोमदैवत्यो गोसवोदेवनिर्मितः प्रत्नमद्भिः प्रक्तः स्वधयापितॄल्लोकान्प्री

णाहिनः स्वधा इतितिलान्प्रक्षिपेत् ततः सव्येनदेवार्घपात्रद्वयेतूष्णीमेवगंधपुष्पे
प्रक्षिप्य अपसव्येनपित्राद्यर्घपात्रेषु प्रक्षिपेत् ततः सव्यं कृत्वा एवं देवार्घपात्रं
वामहस्ते कृत्वा तत्रस्थितं पवित्रं देवभोजनपात्रे पूर्वाग्रंधृत्वा तदुपरिकिंचिदुदका
न्तरंदत्त्वा ॐ या दिव्या आपः पयसा संबभूवुर्या अन्तरिक्षाउतपार्थिवीर्याः ।
हिरण्यवर्णा यज्ञियास्तानऽआपः शिवः शꣳस्योनाः सुहवाभवन्तु इतिपठित्वा
यवकुशजलान्यादाय ॐ अद्यामुकगोत्राणां पितृपितामहप्रपितामहानाममुकामु
कशर्मणांपार्वणश्राद्धसंबंधिनो विश्वेदेवाः एषवो हस्तार्घो नमःइत्यर्घददुत्सृजेतएव
मेवमातामहादिदेवेभ्योपिदद्यात्ततोऽपसव्यंकृत्वापित्रार्घपात्रं वामहस्तेकृत्वापितृ
भोजनपात्रे दक्षिणाग्रंपवित्रंधृत्वा तदुपरिकिंचिदुदकान्तरंदत्त्वा ॐ या दिव्या

आपः पयसासम्बभूवुर्याअन्तरिक्षा उतपार्थिवीर्याः। हिरण्यवर्णा यज्ञियास्तान आपः शिवाःशꣳस्योनाः सुहवाभवंतु इतिपठित्वा मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन् पार्वणश्राद्धे एषतेहस्तार्घः स्वधेतिअर्घंददद्दुत्सृजेत् एवमेवपितामहादिपंचभ्योदद्यात् ततः सव्यं कृत्वा पवित्रसहितमवशिष्टजलयुतंदेवार्घपात्रद्वयंयथाक्रमंप्रत्येकं देवासनदक्षिणपार्श्वे ॐ विश्वेभ्योदेवेभ्यः स्थानमसीत्युक्त्वोत्तानमेवधारयेत् अपसव्यंकृत्वाकिंचित्प्रपितामहार्घपात्रस्थितपवित्रादीनि पितामहार्घपात्रे कृत्वा तानि सर्वाणिपित्रर्घपात्रेकृत्वापित्रर्घपात्रंपितामहार्घपात्रोपरितदुभयं प्रपितामहार्घपात्रोपरि धृत्वा पितृवामपार्श्वे ॐ पितृभ्यः स्थानमसीतिमिलितान्येव न्युब्जीकुर्यात् एवमेवमातामहाद्यर्घपात्राणिमेलयित्वा माताम

हप्रमातामहवृद्धप्रमातामहेभ्यःस्थानमसि इत्यर्घपात्राणिन्युब्जीकुर्यात् तथा स्थापि
तानि च तानि पात्राणि दक्षिणादानपर्यंतं नोद्धरेत्तनचालयेत्ततःसव्यं कृत्वा
गंधादि दत्त्वा यवकुशजलैः संकल्पंकुर्यात् ॐ अद्यामुकगोत्राणांपितृपितामहप्र
पितामहानाममुकामुकशर्मणां पार्वणश्राद्धसंबंधिनो विश्वेदेवाः एतानि गंधपुष्पधू
पदीपताम्बूलयज्ञोपवीतवासांसि वो नम इति यथासंभवमुत्सृजेत्एवमेव मातामहा
दिदेवेभ्योपिदद्यात् ततोऽपसव्यं कृत्वा गंधादि दत्त्वा मोटकतिलजलान्यादाय ॐ
अद्यामुकगोत्रपितरमुकशर्मन् पार्वणश्राद्धेएतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवा
सांसि ते स्वधेतिपित्रे गंधादि दद्यात् एवमेव पितामहादिपंचभ्योपि दद्यात्ततो
जलेन भोजनपात्रसहितमासनं वेष्टयित्वा मंडलानि कुर्यात् ततः श्राद्धदेयान्नाग्र

भागमानीय सघृतं तत्सव्येनैवप्राङ्मुखः पुटकादिस्थितजले आहुतिद्वयं जुहुयात ॐ अग्नयेकव्यवाहनाय स्वाहा ॐ सोमाय पितृमते स्वाहा ततो जलघृतसहितं तिलव्यंजनयुतमन्नमपसव्येन ॐ इदमन्नमेतद्भूस्वामिपितृभ्योनमःइतिदद्यात् ततो हुतशेषमन्नंकिंचित्किंचित्सव्येनदेवपात्रद्वयेअपसव्येनपित्रादिपात्रेषु दत्त्वापिंडार्थं किंचिदवशेषयेत् तत उत्कृष्टमन्नं सिद्धमामंवापुरुषाहारक्षमं प्रत्येकं परिविष्य यथासंभवमुपकरणं जलं घृतं च तत्रोपनीय सव्येन दैवे अपसव्येनपित्रादिपात्रेषुमध्वन्नोपरि दत्त्वा प्रत्येकं ॐ मधुवाताऽऋतायते मधुक्षरंति सिन्धवः माध्वीर्नःसन्त्वोषधीः ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव ँ रजः मधुद्यौरस्तुनः पिता ॐ मधुमान्नोव्वनस्प तिर्म्मधुमाँऽ अस्तुसूर्यः । माध्वीर्गावो भवन्तुनः ॐ मधु मधुमध्वितिचजपेत् ततः

सव्येनउत्तानपाणिभ्यांदेवपात्रंस्पृष्ट्वा ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्य मुखेऽ
अमृतेऽ अमृतं जुहोमि स्वाहाॐ इदंविष्णुर्विचक्रमे त्रेधानिदधेपदम्समूढमस्यपाꣳ
सुरे इति पठित्वा ॐ कृष्णहव्यमिदं रक्ष मदीयमितिपठित्वा ॐ इदमन्न
मित्यन्ने ॐ इमाआपेतिजले ॐ इदमाज्यमितेघृते ॐ इदंहविरितिपुनरन्ने
दक्षिणकरांगुष्ठमावेश्य ॐ यवोसि यवयास्मद्वेषो यवयारातीरिति यवानन्ने प्रक्षिप्य
ॐ अद्यामुकगोत्राणां पितृपितामहप्रपितामहानाममुकामुकशर्मणां पार्वणश्राद्धसं
बंधिनोविश्वेदेवा एतद्वोन्नं सोपकरणं नमः इति कुशत्रययवजलैरुत्सृजेत् एवमेव
मातामहादिदेवेभ्योपिदद्यात् ततोऽपसव्यं कृत्वादक्षिणामुखः पातितवामजानुः
पितृपात्रं न्युब्जाभ्यां व्यस्ताभ्यांपाणिभ्यांस्पृष्ट्वा ॐ पृथिवीतेपात्रंद्यौरपिधानं ब्राह्म

णस्य मुखे अमृते अमृतं जुहोमि स्वाहा ॐ इदं विष्णुर्विचक्रमेत्रेधानिदधे पदम्
समूढमस्यपाꣳसुरे इतिपठित्वा ॐ कृष्णकव्यमिदंरक्षमदीयमितिपठित्वा ॐ इदम
न्नमित्यन्ने ॐ इमाआपइतिजले ॐ इदमाज्यमितिघृते ॐ इदंकविरितिपुनरन्नेदक्षि
णकरांगुष्ठमावेश्य ॐ अपहताऽअसुरा रक्षाꣳसि वेदिषदः इत्यन्नोपरि तिलजलानि
विकीर्य मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रायपित्रे अमुकशर्मणे पार्वण
श्राद्धेएतत्तेन्नं सोपकरणं स्वधेति पित्रेन्नमुत्सृजेत् एवमेव पितामहादिभ्योपिदद्यात्
यद्येकं पात्रं भवति तदा पृथिवीतेपात्रमितिमंत्रः पुनर्नपठनीयःततःअन्नहीनंक्रिया
हीनं विधिहीनंचयद्भवेत् तत्सर्वमच्छिद्रमस्तु इतिजपेत् ततोगायत्रींत्रिर्जपेत् ततः
कुशेषूपविश्य ॐ मधुव्वाताइतित्र्यृचंजप्त्वारक्षोघ्नीः ॐ कृणुष्वपाजइत्याद्यास्यृ

चः पठित्वा भूमिं तिलैरवकिरेत् । ॐ उदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः । असुँय्यईयुरवृकाऽऋतज्ञास्ते नोवन्तु पितरो हवेषु इत्यादिपितृमन्त्रान् ॐसहस्रशीर्षेत्यादिपुरुषसूक्तंजपेत्ॐआशुःशिशानइत्यादिकमप्रतिरथम् अन्यानिच पवित्राणिजपेत्। पुराणेतिहासमन्त्रादीनिजपेत् तत उच्छिष्टसन्निधावास्तृतकुशत्रयां भूमिंप्रोक्ष्यसर्वप्रकारमन्नमुद्धृत्य सतिलमेकीकृत्यॐअग्निदग्धाश्च येजीवा येप्यदग्धाः कुलेमम । भूमौदत्तेनतृप्यन्तुतृप्ता यांतु परांगतिमिति कुशोपर्यन्नमुत्सृजेत् ततः सव्यंकृत्वाचम्य हरिं स्मृत्वा गायत्रीं मधुव्वाता इत्यृचं मधुमधुमध्विति चंजपेत् ततोपसव्यंकृत्वापिंडपातनार्थं निर्मितहस्तमात्रचतुरंगुलोच्छ्रितदक्षिणप्लवपिण्डका हृयमध्यस्थानसव्यहस्तधृतोपरिभागे दक्षिणहस्तधृतमूलेन पवित्रेण ॐ अपहताऽ

असुररक्षा ॐ सिवेदिषदःइतिमंत्रेण प्रादेशमात्रमुल्लिखेत्पवित्रमैशान्यां दिशिक्षिपेत् ततः उभयत्र ॐ येरूपाणिप्रतिमुंचमानाऽअसुराः संतः स्वधयाचरंति परापुरो निपुरो ये भरंत्यग्निष्टाँल्लोकान्प्रणुदात्यस्मादितिमंत्रेण ज्वलदंगारं प्रत्येकं भ्रामयेत अंगारं दक्षिणतो निदध्यात् तत उपमूलसकृदच्छिन्नदक्षिणाग्रकुशत्रयंरेखायामास्तृणुयात् ततः सव्यंकृत्वा ॐदेवताभ्यइतित्रिर्जपेत् ततोऽपसव्यं कृत्वा पुटकषट्के जलतिलगंधपुष्पाणि कृत्वा एकंपात्रंवामहस्तेकृत्वामोटकतिलजलान्यादायॐअद्यामुकगोत्रपितरमुकशर्मन् पार्वणश्राद्धपिंडस्थानेऽत्रावनेनिक्ष्वते स्वधा इत्यास्तृतदर्भमूलेऽवनेजनं दद्यात् एवं पितामहायापरपात्रमादायकुशमध्ये तृतीयं पात्रमादाय प्रपितामहाय कुशाग्रे दद्यात एवमेवपरपिंडिकायामपि यथाक्रमं कुशेष्ववनेज

नादि दद्यात् ततः सव्यंजनतिलजलमध्वाज्यहुतशेषान्नेन षट्पिण्डान्निर्म्माय मधु
घृताभ्यामभिघार्य्य दद्यात् । प्रथमं मोटकतिलजलपिण्डमादाय ॐ अद्यामुकगोत्र
पितरमुकशर्मन् पार्वणश्राद्धे एष ते पिण्डः स्वधा इतिप्रथमावनेजनस्थाने पिण्डं
दद्यात् एवंपितामहप्रपितामहयोः प्रत्येकं तत्तदवनेजनस्थाने पिण्डं दद्यात एवमेव
परपिंडानपि द्वितीयपिण्डिकायां तत्तदवनेजनस्थाने मातामहादिभ्यो दद्यात् पिण्ड
दानंचसव्योपगृहीतदक्षिणहस्तेन कार्यम् । ततः प्रपितामहादूर्ध्वं त्रयाणां लेपभाग
भुजां तृप्तिमुद्दिश्य ॐ लेपभागभुजस्तृप्यंतु इति पठित्वा पित्रादिकपिण्डाधा
रकुशमूलेकरंप्रोक्ष्यसव्यंकृत्वा त्रिराचामेत् ततो हरिं स्मृत्वा अपसव्यं कृत्वा दक्षि
णामुखः ॐ अत्रपितरोमादयध्वं यथाभागमावृषायध्वमिति पठित्वा वामावर्तेनोद

ङ्मुखीभूय प्रीतमनाः श्वासं नियम्य तेनैव पथापरावर्तमानः पितॄन्भास्वरमूर्तीन् ध्यायन् अमीमदन्तपितरोयथाभागमावृषायिषतइतिजपेत् । ततः पूर्वदत्तावशिष्ट जलयुतमवनेजनपात्रमादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन् पार्वणश्राद्धेपिण्डेऽत्र प्रत्यवनेनिक्ष्वतेस्वधेतिप्रथमपिंडोपरिप्रत्यवनेजनं दद्यात । एमेवतत्तदवनेजनपात्रैः पितामहादिभ्यस्तत्तत्पिण्डोपरिप्रत्यवनेजनंदद्यात् ततोनीवींविस्रस्य सव्येनाचम्य अपसव्यंकृत्वा वामेनपाणिनानीयदक्षिणकरेसूत्रंकृत्वा ॐ नमोवः पितरोरसाय नमोवः पितरः शोषाय नमोवः पितरो जीवाय नमो वः पितरः स्वधायै नमोवः पितरोघोराय नमोवः पितरोमन्यवेनमोवः पितरः पितरोनमोवोगृहान्नः पितरोदत्त सतोवः पितरोदेष्म इति पठित्वा एतद्वः पितरोवास इत्युक्त्वा षट्सुपिण्डेषुसूत्राणि

धृत्वामोटकतिलजलान्यादाय ॐ अद्यामुकगोत्र पितरमुकशर्मन् पार्वणश्राद्धपिंड
एतत्तेवासः स्वधेतिसूत्रमुत्सृजेत् । एवमपरपिण्डपंचकेषु तत्तन्नाम्नोत्सृजेत् ततो गंध
पुष्पधूपदीपतांबूलानिप्रत्येकं पिण्डेषुदद्यात् ततः ॐ शिवाआपः सन्त्वितिजलं ॐ
सौमनस्यमस्त्वितिपुष्पं ॐ अक्षतंचारिष्टमस्त्वितितंडुलान्नपात्रेषुक्षिपेत् । ततो
मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकशर्मणः पार्वणश्राद्धे दत्तैत
दन्नपानादिकमक्षय्यमस्त्वित्युत्सृजत् एवमेवपितामहादीनांषष्ठयंतनाम्नां प्रत्येकमु
त्सृजेत् । ततः सव्यंकृत्वा दक्षिणांदिशपश्यन्नसुमनाः पिण्डोपरि ॐ अघोराः
पितरः संत्वितिपठन् पूर्वाग्रांजलधारांदद्यात् ततः कृतांजलिःप्राङ्मुखआशिषःप्रार्थ
येत् गोत्रं नो वर्द्धतां दातारो नोभिवर्द्धन्तांवेदाः संततिरेवचश्रद्धाचनोमाव्यगमद्बहु

देयंचनोस्तु अन्नंचनोबहुभवेदतिथींश्च लभेमहि याचितारश्च नः संतु माच याचिष्म
कंचन एताः सत्य आशिषः संतु ततोऽपसव्यं कृत्वा पिंडोपरि सपवित्रकुशानास्तीर्य
ॐ उर्ज्जं व्वहन्तीरमृतं घृतम्पयः कीलालम्परिस्रुतम् स्वधास्थतर्प्पयत मे पितॄनि
तिमंत्रेण सपवित्रकुशोपरि दक्षिणाग्रां जलधारां दद्यात् ततः स्वस्थानस्थितानेवपि
ण्डान्नम्रीभूयाघ्रायोत्थापयेत् ततः पिण्डाधारकुशानुल्मुकद्वयंचवह्नौक्षिपेत् । ततः
सव्येनदेवार्घपात्रद्वयंसंचाल्याऽपसव्येन पित्रर्घपात्राण्युत्तानीकृत्य सव्येन कुशत्रयय
वजलैर्देवदक्षिणां दद्यात ॐ अद्यामुकगोत्राणां पितृपितामहप्रपितामहानाममुकामु
कशर्मणां पार्वणश्राद्धसंबंधिनां विश्वेषां देवानां कृतैतत्पार्वणश्राद्धप्रतिष्ठार्थं हिरण्य
मग्निदैवतं यथानामगोत्रायब्राह्मणाय दक्षिणां दातुमहमुत्सृजे एवं मातामहादिश्राद्ध

संबंधिविश्वेदेवब्राह्मणाय दक्षिणां दद्यात् ततोऽपसव्येन मोटकतिलजलान्यादाय पित्रादिश्राद्धदक्षिणां दद्यात ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणः कृतैतत्पार्वण श्राद्धप्रतिष्ठार्थमिदं रजतं चंद्रदैवतं यथानामगोत्रायब्राह्मणायदक्षिणांदातुमहमुत्सृजे एवंपितामहादिश्राद्धानामपिदक्षिणांदद्यात् हिरण्यरजतादिसंपत्तौ यथासंभवमन्यद पिफलमूलादिकंदक्षिणांदद्यात् ॐवाजे वाजेवतवाजिनो नोधनेषु विप्राऽअमृताऽऋतज्ञाः । अस्य मध्वः पिबतमादयध्वं तृप्ता यातपथिभिर्देवयानैरितिपित्रादीन् विसर्जयेत् ॐविश्वेदेवाः प्रीयंतामिति देवविसर्जनम् ततःसव्येनदेवताभ्यःपितृभ्यश्चेतित्रिर्जपेत ततोऽपसव्येनरक्षादीपं निवाप्य सव्यं कृत्वा हस्तौ पादौ प्रक्षाल्याचम्य ॐ प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषु यत्। स्मरणादेवतद्विष्णोःसंपूर्णं स्यादितिश्रुतिरि

तिपठित्वाकर्मपूर्णतार्थंविष्णुं स्मरेत्। श्राद्धीयद्रव्याणिब्राह्मणायप्रतिदापयेत्। तदभा
वेजलेवाक्षिपेत् ततो वैश्वदेवबलिकर्मणीकुर्यात् तदुक्तं स्वाहांतास्ताजलेवाग्नौ कुर्यात्पं
चाहुतीःक्रमात् ॥ ब्रह्मा प्रजापतिर्गृह्यःकश्यपोनुमतिस्तथा ॥१॥ चतुर्थ्यंतैर्जलंक्षिप्त्वा
वैश्वदेवबलिंचरेत् ॥ पर्जन्य अपःपृथिवीधातापिचविपूर्वगः ॥२॥ चतुर्वायुःप्राच्यवाची
प्रतीचीचाप्युदीच्यपि ॥ ब्रह्मान्तरिक्षसूर्याश्चविश्वेदेवास्ततःपरम् ॥३॥विश्वेभूताउषा
श्चापिभूतानां च पतिस्तथा ॥ अपसव्येनसतिलंपितृभ्यश्चस्वधानमः ॥४॥ सनकादि
सप्तमर्त्येभ्यो हंतकंठोपवीतवान् ॥ यक्ष्मैतत्तेचसव्येनजलंनिर्णेजनंनमः॥५॥दद्यात्का
काश्चचांडालाः पतिताः पापसंगिनः॥ ततःकीटपतंगाश्चगावः श्वानौ ततःपरम् ॥६॥
चतुर्थ्यंतानुपादाय नमोन्तान् क्रमतः पठेत् ॥ देवामनुष्याः पशवोवयांसिसिद्धाः

सयक्षोरगदैत्यसंघाः ॥ प्रेताः पिशाचास्तरवः समस्तायेचान्नमिच्छंतिमयाप्रदत्तम् ॥ १ ॥ कीटाः पतंगास्तरवश्चवृक्षाजलेस्थलेयेविचरंतिजीवाः ॥ तेतृप्तिमायांतुमयाप्रदत्तंतेभ्योविसृष्टं भुविचान्नमेतत् ॥ २ ॥ पिपीलिकाःकीटपतंगकाद्याबुभुक्षिताःकर्मनिबंधबद्धाः । प्रयांतु तेतृप्तिमिदंमयान्नंतेभ्योविसृष्टंसुखिनोभवंतु ॥ ३ ॥ येषांनमाता नपितानबंधुर्नचान्नसिद्धिर्नतथान्नमस्ति ॥ नतृप्तयेन्नंभुविदत्तमेतत्तेचान्नतृप्तामुदिता भवंतु ॥४॥ शंखः । सौरभेय्य इतिगोभ्यस्ततः द्वौश्वानावितिश्वभ्यः । ऐंद्रेतिवायसानांचशनकैर्निक्षिपेद्भुवि ॥ ततो ब्राह्मणान्भोजयत् ॥ इतिनैमित्तिकश्राद्धबलिदानमिति । यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु ॥ न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतम् ॥ इति पार्वणश्राद्धविधिःसमाप्तः ॥

॥ श्रीगणेशाय नमः॥अथ गोग्रासः॥सुरभिर्मातासुरभिः पितासुरभिः पितृतारिणी ॥ गोग्रासंचमयादत्तंसुरभेप्रतिगृह्यताम् ॥ १ ॥ हंतकारः ॥ हंतकारंमयादत्तं पितृनुद्दिश्यहेतवे ॥ गृहाणत्वं कृपांकृत्वाक्षेमायुष्यंकरोतु मे ॥१॥ अथातिथिपूजा ॥ अतिथेर्दर्शनं पुण्यंविष्णुमूर्तिर्विराजते ॥ पितॄनुद्दिश्यदीयंत पित्र्येदेवेतथार्पणात् ॥ १ ॥ अपसव्यम्–यमोसियमदूतोसिवायसोसिमहाबल॥ अहोरात्रकृतंपापंबलिंभक्षतुवायसः ॥ १ ॥ श्वानबलिः ॥ श्वानमार्ज्जारकीटादिबलिभक्षेभ्योदीयताम् ॥ ममक्षेमाय चारोग्यं रक्षरक्ष कुलं मम ॥ १ ॥

ॐशान्तिः शान्तिः शान्तिः ।

विक्रय्य पुस्तकें (कर्मकाण्डग्रंथाः)

नाम.	की. रु. आ.	नाम.	की. रु. आ.
आह्निककर्मसूत्रावाली	२–८	एकोद्दिष्टश्राद्धप्रयोग	०–२
आह्निकशुक्लयजुर्वेदी	१–०	एकोद्दिष्टश्राद्धप्रयोग–भाषाटीकासहित	०–२॥
आह्निकऋग्वेद	१–८	कात्यायनीयशान्ति	०–२
आश्लेषाशान्ति और ज्येष्ठाशान्ति	०–२	कात्यायनीयतर्पण–बड़ा	०–२
उपाकर्मपद्धति	१०–०	कुण्डविंशति	१–४
एकलिंगतोभद्र–रंगीन	०–१॥	कुशकण्डिकाभाष्य	०–४

पुस्तक मिलनेका ठिकाना–

खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" स्टीम्–प्रेस, बम्बई.

गङ्गाविष्णु श्रीकृष्णदास, "लक्ष्मीवेङ्कटेश्वर" स्टी ए-प्रेस, कल्याण–बम्बई.

॥ इत्यपात्रिकपार्वणश्राद्धप्रयोगः समाप्तः ॥